श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २४

*प्रह्लादचरितवर्णनम्*

हिरण्याक्षे पोत्रिप्रवरवपुषा देव भवता
    हते शोकक्रोधग्लपितधृतिरेतस्य सहजः।
हिरण्यप्रारम्भः कशिपुरमरारातिसदसि
    प्रतिज्ञामातेने तव किल वधार्थं मधुरिपो॥ १॥

विधातारं घोरं स खलु तपसित्वा नचिरतः
    पुरः साक्षात्कुर्वन् सुरनरमृगाद्यैरनिधनम्।
वरं लब्ध्वा दृप्तो जगदिह भवन्नायकमिदं
    परिक्षुन्दन्निन्द्रादहरत दिवं त्वामगणयन्॥ २॥

निहन्तुं त्वां भूयस्तव पदमवाप्तस्य च रिपो-
    र्बहिर्दृष्टेरन्तर्दधिथ हृदये सूक्ष्मवपुषा।
नदन्नुच्चैस्तत्राप्यखिलभुवनान्ते च मृगयन्
    भिया यातं मत्वा स खलु जितकाशी निववृते॥ ३॥

ततोऽस्य प्रह्लादः समजनि सुतो गर्भवसतौ
    मुनेर्वीणापाणेरधिगतभवद्भक्तिमहिमा।
स वै जात्या दैत्यश्शिशुरपि समेत्य त्वयि रतिं
    गतस्त्वद्भक्तानां वरद परमोदाहरणताम्॥ ४॥

सुरारीणां हास्यं तव चरणदास्यं निजसुते
    स दृष्ट्वा दुष्टात्मा गुरुभिरशिशिक्षच्चिरममुम्।
गुरुप्रोक्तं चासाविदमिदमभद्राय दृढमि-
    त्यपाकुर्वन् सर्वं तव चरणभक्त्यैव ववृधे॥ ५॥

www.prapatti.com

अधीतेषु श्रेष्ठं किमिति परिपृष्टेऽथ तनये
भवद्भक्तिं वर्यामभिगदति पर्याकुलधृतिः।
गुरुभ्यो रोषित्वा सहजमतिरस्येत्यभिविदन्
वधोपायानस्मिन् व्यतनुत भवत्पादशरणे॥ ६ ॥

स शूलैराविद्धः सुबहु मथितो दिग्गजगणै-
र्महासर्पैर्दष्टोऽप्यनशनगराहारविधुतः।
गिरीन्द्रावक्षिप्तोऽप्यहह ! परमात्मन्नयि विभो
त्वयि न्यस्तात्मत्वात् किमपि न निपीडामभजत॥ ७ ॥

ततः शङ्काविष्टः स पुनरतिदुष्टोऽस्य जनको
गुरूक्त्या तद्गेहे किल वरुणपाशैस्तमरुणत्।
गुरोश्चासान्निध्ये स पुनरनुगान् दैत्यतनयान्
भवद्भक्तेस्तत्त्वं परममपि विज्ञानमशिषत्॥ ८ ॥

पिता शृण्वन् बालप्रकरमखिलं त्वत्स्तुतिपरं
रुषान्धः प्राहैनं कुलहतक कस्ते बलमिति।
बलं मे वैकुण्ठस्तव च जगतां चापि स बलं
स एव त्रैलोक्यं सकलमिति धीरोऽयमगदीत्॥ ९ ॥

अरे क्वासौ क्वासौ सकलजगदात्मा हरिरिति
प्रभिन्ते स्म स्तंभं चलितकरवालो दितिसुतः।
अतः पश्चाद्विष्णो न हि वदितुमीशोऽस्मि सहसा
कृपात्मन् विश्वात्मन् पवनपुरवासिन् मृडय माम्॥ १० ॥

**********